# श्री शौरिराज द्वादशनाम् स्तोत्रम्

उत्पलै रावृते दिव्ये
विमाने नित्यवासिनम् ।
शौरिराजमहं वन्दे
प्रपन्न जनवत्सलम् ।। १

कंचेशं च वहन् विष्णुः
केशवः कीर्त्यते बुधैः ।
पूजकार्थ वहन् केशं
शौरिर्हि नित्य केशवः ।। २

यस्यायनं श्रुताः नारा
सहि नारायणः स्मृतः ।
नाराणामयनं भूत्वा
शौरिर्नारायणः स्वयम् ।। ३

पद्मिन्याः वचनं श्रुत्वा
शौरिः पालयति प्रजाः ।
मातुर्युक्तपतिर्भूत्वा
माधवः सः प्रकीर्तितः ।। ४

मातुर्वचनमास्त्य
शौरिः रक्षति भूतलम् ।
मातुः सहचरश्चायं
माधवो महितो भुवि ।। ५

शौरिं दृष्ट्वा व्रजे गोपाः
गवां पालन तत्परम् ।
प्रेम बाष्पार्द्र नेत्रास्ते
गोविन्दे त्यजपन् सदा ।। ६

अन्तः प्रविश्य भूतानां
शौरिः बहिश्च वर्तते ।
व्याप्य विश्वमिदं सर्वं
विष्णुरित्यभिगीयते ।। ७

पद्मिन्याः मधुरूपिण्याः
शौरिराट् सूदनप्रियः ।
राक्षसं च मधुं हत्वा
राजते मधुसूदनः ।। ८

मधुरूपमरिं हत्वा
ख्यातो हि मधुसूदनः ।
भक्तारीन् सूदयन् शौरिः
जातो भक्तारिसूदनः ।। ९

विजित्य द्यां च पृथ्वीं च
शौरिः पादाब्जविक्रमैः ।
विक्रमं दर्शयन् लोके
त्रिविक्रमोऽभवत्पुरा ।। १०

पदेनैकेन पृथ्वीं च
द्यामन्येन तथाऽऽक्रमन् ।
विक्रमं दर्शयन् शौरिः
स्तूयतेऽसौ त्रिविक्रमः ।। ११

शौरे! भूभाग याच्ञार्थं
त्वया हस्तः प्रसारितः ।
वामन! त्वं तथा दृष्टः
मत्पाप ग्रहणाय किम् ? ।। १२

आर्द्रदोषक्षमां देवीं
पद्मिनीमति माधुरीम् (सुन्दरीम्) ।
श्रियं धृत्वा स्वयं शौरिः
श्रीधर इति गद्यते (कथ्यते) ।। १३

दोषान् विस्मृत्य भक्तानां
गुणान् श्रावयतीं श्रियम् ।
शौरिर्मनसि संस्थाप्य
स्वयं भवति श्रीधरः ।। १४

तापसानां जनानां च
कृष्णारण्यनिवासिनाम् ।
हृषीकमोहनः शौरिः
हृषीकेशोऽभवत् स्वयम् ।। १५

शौरे! प्रपञ्च सर्गाय
नाभौ सृष्टश्च पद्मभूः ।
पद्मनाभ इति ख्यातः
ब्रूमस्त्वां नु कथं वयम् ।। १६

मात्रे हसन् ददौ दाम
निजबन्धन साधनम् ।
तेन बद्धः स्वयं शौरिः
दामोदर इतीरितः ।। १७

पद्मिनीसहितं शौरिं
प्रणिपत्य पुनः पुनः ।
वकुलाभरणः स्तुत्वा
तुष्टिमाप्नोति नित्यशः ।। १८

एवं संहृष्टहृद्दासः
भक्तिनम्रः सतां प्रियः ।
वकुलाभरणो ब्रूते
शौरिराजाय मङ्गलम् ।। १९